दमयन्त्युवाच।

मां चेदिच्छसि जीवन्तीं मातः सत्यं ब्रवीमि ते।

नरवीरस्य वै तस्य नलस्यानयने यत॥ ३-६७-१ ॥

बृहदश्व उवाच।

दमयन्त्या तथोक्ता तु सा देवी भृशदुःखिता।

बाष्पेण पिहिता राजन्नोत्तरं किंचिदब्रवीत्॥ ३-६७-२॥

तदवस्थां तु तां दृष्ट्वा सर्वमन्तःपुरं तदा।

हाहाभूतमतीवासीद्भृशं च प्ररुरोद ह॥ ३-६७-३॥

ततो भीमं महाराज भार्या वचनमब्रवीत्।

दमयन्ती तव सुता भर्तारमनुशोचति॥ ३-६७-४॥

अपकृष्य च लज्जां मां स्वयमुक्तवती नृप।

प्रयतन्तु तव प्रेष्याः पुण्यश्लोकस्य दर्शने॥ ३-६७-५॥

तया प्रचोदितो राजा ब्राह्मणान्वशवर्तिनः।

प्रास्थापयद्दिशः सर्वा यतध्वं नलदर्शने॥ ३-६७-६॥

ततो विदर्भाधिपतेर्नियोगाद्ब्राह्मणर्षभाः।

दमयन्तीमथो दृष्ट्वा प्रस्थिताः स्मेत्यथाब्रुवन्॥ ३-६७-७॥

अथ तानब्रवीद्भैमी सर्वराष्ट्रेष्विदं वचः।

ब्रुवध्वं जनसंसत्सु तत्र तत्र पुनः पुनः॥ ३-६७-८॥

क्व नु त्वं कितव छित्त्वा वस्त्रार्धं प्रस्थितो मम।

उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय॥ ३-६७-९॥

सा वै यथा समादिष्टा तत्रास्ते त्वत्प्रतीक्षिणी।

दह्यमाना भृशं बाला वस्त्रार्धेनाभिसंवृता॥ ३-६७-१०॥

तस्या रुदन्त्याः सततं तेन शोकेन पार्थिव।

प्रसादं कुरु वै वीर प्रतिवाक्यं ददस्व च॥ ३-६७-११॥

एतदन्यच्च वक्तव्यं कृपां कुर्याद्यथा मयि।

वायुना धूयमानो हि वनं दहति पावकः॥ ३-६७-१२॥

भर्तव्या रक्षणीया च पत्नी हि पतिना सदा।

तन्नष्टमुभयं कस्माद्धर्मज्ञस्य सतस्तव॥ ३-६७-१३॥

ख्यातः प्राज्ञः कुलीनश्च सानुक्रोशश्च त्वं सदा।

संवृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात्॥ ३-६७-१४॥

anukrośa *m* – сострадание;

स कुरुष्व महेष्वास दयां मयि नरर्षभ।

आनृशंस्यं परो धर्मस्त्वत्त एव हि मे श्रुतम्॥ ३-६७-१५॥

ānṛśaṃsya *n* – милосердие, сострадание;

एवं ब्रुवाणान्यदि वः प्रतिब्रूयाद्धि कश्चन।

स नरः सर्वथा ज्ञेयः कश्चासौ क्व च वर्तते॥ ३-६७-१६॥

यच्च वो वचनं श्रुत्वा ब्रूयात्प्रतिवचो नरः।

तदादाय वचः क्षिप्रं ममावेद्यं द्विजोत्तमाः॥ ३-६७-१७॥

यथा च वो न जानीयाच्चरतो भीमशासनात्।

पुनरागमनं चैव तथा कार्यमतन्द्रितैः॥ ३-६७-१८॥

यदि वासौ समृद्धः स्याद्यदि वाप्यधनो भवेत्।

यदि वाप्यर्थकामः स्याज्ज्ञेयमस्य चिकीर्षितम्॥ ३-६७-१९॥

एवमुक्तास्त्वगच्छंस्ते ब्राह्मणाः सर्वतोदिशम्।

नलं मृगयितुं राजंस्तथा व्यसनिनं तदा॥ ३-६७-२०॥

ते पुराणि सराष्ट्राणि ग्रामान्घोषांस्तथाश्रमान्।

अन्वेषन्तो नलं राजन्नाधिजग्मुर्द्विजातयः॥ ३-६७-२१॥

ghoṣa *m, pl.* – стоянки пастухов;

तच्च वाक्यं तथा सर्वे तत्र तत्र विशां पते।

श्रावयां चक्रिरे विप्रा दमयन्त्या यथेरितम्॥ ३-६७-२२॥